श्रीशंवदे॥मनुकेतेवादिनइत्यतःप्रथमंचार्वाकापरनामकलोकायतमतमुपन्यस्यति॥आत्मेति॥तदुक्तंवेदांतकल्पलतिकायां॥तत्रलोकायतिका
स्तावत्लोकानुसारिणोमनुष्यत्वादिविशिष्टभूतचतुष्टयसंघातएवचैतन्यमन्यमानानागमपुराणानुमानादिमानांतरप्रसिद्धमपि
देहादिव्यतिरिक्तंचैतन्यंबंधमोक्षभागिनमभ्युपायपलपंतिनाप्रत्यक्षंप्रमाणमितिवदंतइति॥१॥मनुयादिप्रत्यक्षभिन्नंप्रमाणमेवनास्तीति
चेन्नार्हचार्वाकस्यतवभोजनादावपिप्रवृत्तिर्नस्यान्निष्टसाधनताज्ञानाभावात्प्रवृत्तिवाच्छिन्नंप्रतिइष्टसाधनताज्ञानस्यैवकारणतायादित्यनो
क्तत्वेत्यादियुक्तानिरुक्तमतस्यदुष्टत्वादनुमानस्यापिप्रामाण्यवादिनांबौद्धानामतचतुष्टयंस्पष्टयन्प्रथमंयोगाचाराख्यविज्ञानवादिनाबुद्धशासनि
शेषस्यमतमाह॥विज्ञानमितिद्वाभ्यां॥सोपप्लवसंतानरूपकंउपप्लवःसकलोरागद्वेषादिरूपःप्रपंचोपसर्गस्तेनसहितोयःसंतानःप्रवाहःसएवरूप

श्रीशंवदे॥आत्मादेहोमृतिर्मोक्षस्तत्त्वंभूतचतुष्टयं॥प्रत्यक्षमेवमानंचत्याहुर्लोकायतामुढाः॥१॥विज्ञानंक्षणिकंसोपप्लवसंतानरूपकं॥निरु
पप्लवसर्वज्ञसंतानोजीवईश्वरः॥२॥भिन्नाभिन्नोजगद्धेतुर्मुक्तिश्चेशेविलीयते॥योगाचारमतेमानंप्रत्यक्षंचानुमानकं॥३॥
आकारोयस्यएताद्दृक्षणिकंप्रतिक्षणविनश्वरंविज्ञानंबुद्धाख्यंविशिष्टज्ञानमेवजीवस्तथातदेवउक्तरूपंक्षणिकंविज्ञानमेवनिरुपप्लवसर्वज्ञ
संतानः निर्गतः उपप्लवः निरुक्तोपसर्गोयस्मादेताद्दृशोयःसर्वज्ञःनिखिलवित्सचासौसंतानःप्रवाहश्चेतितथानिरुक्तसंतानरूपंसदित्यर्थः॥२॥
सर्वज्ञविनजगताचसहभिन्नाभिन्नोभेदसहिष्णुभेदलक्षणतादात्म्यशालीजात्यादिवद्भवतीत्यन्वयः॥स्फुटमेवान्यत्॥उक्तंहिसिद्धांतविंदावीश्वरं
प्रकृत्यपरिणामिनित्यःसर्वज्ञोभिन्नाभिन्नइतिजैनाइति॥क्षणिकःसर्वज्ञातीसौगताइतिच॥वेदांतकल्पलतिकायामपि॥विज्ञानवादिनस्तुक्षणिकंवि
ज्ञानस्कंधंदेहेंद्रियादिव्यतिरिक्तंआत्मत्वेनमन्यमानाश्चतुर्विधनैरात्म्यभावनयात्मन्यसोपप्लवंविज्ञानस्यात्यंतोपरमंवानिरुपप्लवसर्वज्ञसंतानोनर्मबंधमो
क्षमिछंतीति॥३॥

ननुयदिविज्ञानमेवसन्नवहुटादिकमिवसमवभासतेतदपिक्षणिकमेवेतिचेत्तर्हि सोयंघटइतिप्रत्यभिज्ञानस्याद्दीपज्वालावदत्यंतसादृश्यात्कथंचि
न्नदुपपन्नावपितदर्थेनवप्रहत्यनापत्तेर्भोग्यस्यासत्वात्भोक्तुःक्षणिकत्वाच्चेत्याशंक्यानुमेयक्षणिकभोग्यसत्ववादिनः सौत्रांतिकसंज्ञस्यसुगता
परशिष्यस्यापिमतंसंक्षिपति॥ज्ञानानुमेयमित्यर्धनेव॥बाह्यंक्षणिकमपिघटादिवद्यतेज्ञानगम्यत्वाद्व्यतिरेकेवंध्यापुत्रवदितिप्रयोगः॥एवंतर्हि
घटएवास्मीत्यनुभवस्यकागतिः॥किंचाक्षरूपस्यापिबाह्यस्यकेलक्षणमितिचेत्तत्रप्रत्यक्षत्वाद्यंगीकर्तुर्वैभाषिकाभिधस्यैवनाज्ञिकृतीय
शिष्यस्यापिसिद्धांतंबोधयति॥स्वलक्षणमित्यर्धनेव॥स्वतन्नहुटादित्वमेवलक्षणंयस्यतत्तथेत्यर्थः॥तनू॥बाह्यअन्वक्षंप्रत्यक्षंचेतिवैभाषि
काअपिजगुरित्यनुषज्यसंबंधः॥तथाचाक्षुःश्रीभाष्यरत्नप्रभाकराः सौत्रांतिकोवैभाषिकोयोगाचारोमाध्यमिकश्चेतिचत्वारः॥शाक्य

ज्ञानानुमेयंक्षणिकंबाह्यंसौत्रांतिकाजगुः॥स्वलक्षणंतदन्वक्षंचेतिवैभाषिकाअपि॥४॥
मतद्वयेपिशिष्टंतुयोगाचारमतंमतं॥शून्यंमाध्यमिकाश्चाक्षुरन्यत्सर्वंभ्रमात्मकं॥५॥

शिष्यास्तेषाद्ययोर्बाह्यार्थानांपरोक्षतापरोक्षत्वविवादेप्यस्तित्वसंप्रतिपत्तेरिति॥४॥अस्त्वेवंयथाकथंचिन्मतद्वयेपिजगद्ध्वस्तजावेशमानमो
क्षाख्यपदार्थचतुष्टयंतुकथमितिचेद्विज्ञानवादिवदेवेत्याह॥मतद्वयेपीत्यर्धनेव॥शिष्टंसुगतंजीवादीत्यर्थः॥ननुतावतापिभो
क्तृभोग्ययोःक्षणिकत्वदूषणंनतदवस्थमेवेत्यतोमाध्यमिकनामधेयस्यशाक्यशिष्यस्यैवरागद्वेषादिसंभिधत्ते॥शून्यमिति॥स
र्वंभ्रमःदृश्यत्वात्स्वप्नवदतःशून्यमेवतत्वमितिप्राहुरित्यर्थः॥उक्तंहिश्रीमधुसूदनसरस्वतीभिः॥माध्यमिकाःपुनः शू
न्यमात्रमात्मानमुपपादयंतोनकिंचिदपिनत्वमस्तीतिशून्यभावनाप्रकर्षपर्यंतान्नत्वज्ञानाच्छून्यभावमेवापसर्गमाहुरिति॥५॥

एवंक्षपणकमतचतुष्टयंसंक्षिप्यनक्षरमोपन्यासमतेयत्सर्वस्यापिशून्यमेवतत्वमित्युक्तंनछून्यंकिंत्वयाज्ञातंनवा॥नाद्यः॥तज्ज्ञातुस्तवत
नःपार्थक्येनसिद्धत्वापत्यात्द्विन्नात्मसिद्धापत्तेः॥नाप्यंत्यः॥अज्ञातवस्तुसाधकत्वेनअप्रामाणिकत्वादित्याद्यस्वरसादार्हतापरनामकानां
दिगंबराणांमतमुपक्षिपति॥जीवइति॥कर्मेंद्रियाणिखलुपंचतथापराणिबुद्धींद्रियाणिमनआदिचतुष्टयंच॥प्राणादिपंचकमथोवि
यदादिकंचकामश्चकर्मचनमःपुनरष्टमीपूरितिश्रीमत्संक्षेपशारीरकोक्तंकर्मेंद्रियपंचकादिकंपुर्यष्टकमस्त्यास्तीतिपुर्यष्टकीएतादृशःदेह

जीवःपुर्यष्टकीदेहमात्रोमुक्तिस्तुनस्यथा॥ततोर्ध्वगतिःसेतिदिक्पटाःप्रोचुरार्हताः॥६॥

मात्रःशरीरमात्रपरिमितः॥जीवःआत्मास्तीत्यर्थः॥तुपुनस्तस्योक्तलक्षणस्यजीवस्ययासततोर्ध्वगतिः॥सततंऊर्ध्वगतिः निरंत
रोर्ध्वगमनमितियावत्॥सामुक्तिर्भवतीतिदिक्पटाःदिगंबराःआर्हताःप्रोचुरितियोजना॥तदुक्तंवेदांतकल्पलतिकाकारैः॥आर्हताः
स्वदेहेंद्रियव्यतिरिक्तंदेहपरिमाणमात्मानमुपगम्यतस्यपुर्यष्टककर्माष्टकपरिवेष्टितस्यार्हतशास्त्रोक्तेनतपसाःतेनैकाकारसमा
धिपरिपाकेनचाष्टविधध्वंससतिसुखैकतानस्यनिरावरणज्ञानस्यसततोर्ध्वगमनमालोकाकाशागमनंवामोक्षमाचक्षतइति॥६॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

एवमुक्तनास्तिकषट्दर्शनीमुपसंहरन्नुत्तरग्रंथमाह ॥ इतीति ॥ इत्युक्तप्रकारायानास्तिकषट्तंत्र्यांषण्णांषट्संख्यानांतंत्राणांशास्त्राणांसमाहारःषट्तंत्रीतस्या
मित्यर्थः ॥ चार्वाकाणांलोकायतिकानांगुरुर्बृहस्पतिर्नामतोपदेष्टा ॥ गुरुः गीष्पतिर्धिषणोगुरुरित्यमरात्बृहस्पतिरित्यर्थः ॥ अभूदित्यपक्रष्ययोज्यं ॥ तथाचोक्तंशिवाद्वैत
विवेकस्यषट्तंत्रीसाराख्यचतुर्थपरिछेदप्रथमश्लोकटीकायां ॥ चार्वाकशास्त्रप्रणेताबृहस्पतिरिति ॥ अपिचबुद्धःबुद्धोनामाजिनसुतःकीकटेषुभविष्य
तीतिश्रीमद्भागवतोक्तेर्बुद्धावतारोविष्णुरित्यर्थः ॥ चतुर्जिनानांचत्वारश्चतेजिनाश्चेतिकर्मधारयस्तेषां ॥ उक्तंचतुर्विधंसप्तपदार्थकानामित्यर्थः ॥ गुरु
रित्यनुकर्षणीयं ॥ अभूदित्यत्रापिज्ञेयं ॥ एवंदिग्वाससांदिगंबराणांअर्हन्नामानृपविशेषः ॥ गुरुरभूदित्यन्वयः ॥ तथाहि ॥ श्रीमद्भागवतेपंचमस्कंधे
निरूपितमृषभदेवदेहावलंबकथनोत्तरंयस्यकिलानुचरितमुपाकर्ण्यकोंकवेंककुटकानांराजार्हन्नामोपशिक्ष्यकलावधर्मउत्कृष्यमाणेभविन
ष्येनविमोहितःस्वधर्मपथमकुतोभयमपहायकुपथपाषंडसमंजसंनिजमनीषयामंदःप्रवर्तइष्यतइति ॥ एतेषांषण्णामर्हन्नास्तिकत्वंतुअस्मिन्ना
स्तिदृष्टंमतिरितिसूत्रोक्तरीत्याबोध्यं ॥ तत्रेश्वरपरलोकादिकंनास्तीतिमतिसत्वाल्लोकायतानांनास्तिवेदप्रामाण्यादिकमितिमतिसत्वाद्योगाचारादिभिव

॥ इतिनास्तिकषट्तंत्र्यांचार्वाकाणांगुरुर्गुरुः ॥ बुद्धश्चतुर्जिनानामप्यर्हन्दिग्वाससामभूत् ॥ ७ ॥

धबौद्धानां ॥ परलोकादिकमखिलमेवशून्यान्युन्नास्तीतिमतिसत्वान्माध्यमिकानांनास्तीश्वरवेदप्रामाण्यादिकमितिमतिसत्वाद्दिग्वाससांचनास्तिकत्वम
वधेयं ॥ एवंचैतेषामपिभूतलोकायतवदीश्वराभावःपरमाणुचातुर्विध्यमेवजगत्तंत्रंसौगतवन्मानद्वैविध्यमात्रत्वमपिबोध्यं ॥ अत्रैतेषांप्रत्येकंतत्तच्छास्त्रोक्ता
निमुक्तिसाधनानिनुनातीवाषयुक्तानीतिमयानेवोपन्यस्तानीति ॥ ननुभगवताविष्णुनासुरार्चयेणबुद्धरूपमिदंवेदविरुद्धशास्त्रप्रणयनमकारीतिचेदसुर
व्यामोहनार्थमेवेतिजानीहि ॥ किंचकुनावेदांतपातंजलेनशास्त्रिकशास्त्राणामप्यंशतस्तथात्वमस्त्येव ॥ तथाचोक्तंसप्तशतीव्याख्यानेनागोजीभट्टैः पाद्मे
पार्वतीपरमेश्वरसंवादे ॥ शृणुदेविप्रवक्ष्यामितामसानियथाक्रमं ॥ येषांश्रवणमात्रेणपापंतेषांज्ञानिनामपि ॥ प्रथमंहिमयैवोक्तंशैवंपाशुपताभिधं ॥ पश्चात्क्या
वेशनार्थंचैः संप्रोक्तानितत्परं ॥ कणादेननतुवेप्रोक्तंशास्त्रंवैशेषिकंमहत् ॥ गौतमेननथान्यायंसांख्यंतुकपिलेनच ॥ द्विजन्मनाजैमिनीनाप्यर्वेदप्र
काशकं ॥ नीरीश्वरेणवादेनकृतंशास्त्रंमहत्तरं ॥ धिषणेननतथाप्रोक्तंचार्वाकमतिगर्हितं ॥ दैत्यानांनाशनार्थायविष्णुनाबुद्धरूपिणा ॥ वेदार्थवन्महाशा

स्त्रंमायावादमवैदिकं ॥ मयैवकथितंदेवि जगतांनाशकारणादिति ॥ ७ ॥

२

एवंनास्तिकषट्दर्शनीमतान्युपन्यस्येदानीमास्तिकषट्दर्शनीमतोपन्यासमारभमाणः सन्मध्यमपरिमाणत्वेनाभिमतस्यार्हतसंमतात्मनोध्रुवंविनाशि
त्वान्नाद्भुत्ववादिनःकणादस्यमतमाह ॥ द्रव्यादीतिसार्धेन ॥ द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्यपदार्थसप्तकमितियावत् ॥ मेयंप्रमाविष
यमित्यर्थः ॥ जडःअचिद्रूपः गुणोसंख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराख्यचतुर्दशगुणवानित्यर्थः ॥
तत्रबुध्यादयोष्टावात्ममात्रवर्तिनोगुणाःशेषास्तद्द्रव्यांतरवर्तिनोपीतिज्ञेयं ॥ विभुर्महत्परिमाणवान् ॥ एतादृशआत्माजीवोस्तीत्यन्वयः ॥ अत्र
कणभुजइतिपदंप्रत्येकंयोज्यं ॥ कणादस्यमतइत्यर्थः ॥ मेशोपासनतः ईश्वरोपासनसाहितादित्यर्थः ॥ तेषांद्रव्यादिसप्तपदार्थानां ॥ साधर्म्यादि
जबोधतः ॥ साधर्म्यवैधर्म्यज्ञानतज्ज्ञानाद्धेतोरितियावत् ॥ ८ ॥ नवेति ॥ नवसंख्याकायेआत्मनोबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्याः

द्रव्यादिसप्तकंमेयंजडआत्मागुणीविभुः ॥ मेशोपासनतस्तेषांसाधर्म्यादिजबोधतः ॥ ८ ॥ नववैशेषिकगुणध्वंसःकणभुजोमृतं ॥

वैशेषिकाभिधाःगुणाः ॥ तदुक्तं ॥ रूपंगंधोरसःस्पर्शःस्नेहःसांसिद्धिकोद्रवः ॥ बुध्यादिर्भावनांतश्चशब्दोवैशेषिकागुणाइतिनेषांध्वंसोनाशः
प्रागभावासहवृत्तिरूढेरित्यर्थः ॥ मतावत्कणभुजोमतेअमृतंकेवल्यंभवतीतिसंबंधः ॥ अत्रजीवेश्वरजगन्मोक्षसाधनाभिधवस्तुपंचकोक्ता
वधिप्रमाणानुक्तेः ॥ पूर्वोक्तंप्रत्यक्षानुमानाख्यंप्रमाणद्वयमेवैतेषांकाणादानामपिसंमतमितिद्योतनंतदुक्तंषट्तंत्रीसारटीकायांकणा
दंप्रकृत्य ॥ अथयत्प्रमाणद्वयवादित्वात्पूर्वस्माच्छ्रयानिति ॥ निरुक्तमुक्तिप्रक्रियानुक्त्वाश्रीमधुसूदनसरस्वतीभिः ॥ काणादास्तुदेहेंद्रियादिव्य
तिरिक्तंविभुमात्मानंनवविशेषगुणाश्रयंकल्पयंतोजल्पंति ॥ द्रव्यंगुणकर्मसामान्यविशेषसमवायानांषण्णांपदार्थानांसाधर्म्यवैध
र्म्याभ्यांयत्तत्त्वज्ञानंतत्पूर्वकादात्मनस्तत्साक्षात्कारादीश्वरोपासनासहितान्नवानांविशेषिकगुणानांप्रागभावासहवृत्तिः प्रध्वंसएवात्मनःकैवल्यमिति ॥

अहोज्ञाद्प्रामाण्यमनंगीकुर्वतांवैशेषिकाणांकथंनामास्तिकत्वमित्याद्यस्वरसान्नत्वाप्रामाण्यवादिनांनैयायिकानांमतमुपन्यस्यति॥मानादीतिसार्धेनैव॥
प्रमाणप्रमेयादिषोडशपदार्थानामितियावत्॥उद्देशादिभिःउद्देशलक्षणपरीक्षाभिरित्यर्थः॥आत्मनोःजीवात्मपरमात्मनोः॥९॥बोधादीति॥
ससाधनाज्जीवादिसाक्षात्कारात्सवासनमिथ्याज्ञाननिवृत्तौतत्कार्याणांरागद्वेषमोहानांनिवृत्तिरित्यादिपरंपरयेतियावत्॥अमृतमितिछेदः॥चतुर्विधं
प्रत्यक्षानुमानोपमानशब्दाःप्रमाणानीतिपारमर्षसूत्रोक्तचतुःप्रकारकमित्यर्थः॥स्फुटमेवान्यत्॥तथाचाऊर्वेदीनकल्पलतिकाकृतः॥नैयायि
कास्तुप्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानामुद्देशलक्षणपरी

मानादियोडशार्थानामुद्देशादिभिरात्मनोः॥९॥बोधादिपारंपर्येणदुःखस्यानुदयोमृतं॥मानंचतुर्विधंचेतिवक्ष्यतेगौतमानुगैः॥१०॥

क्षाभिरात्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाख्यद्वादशविधप्रमेयनिष्कर्षेणात्मदृढसाक्षात्कारात्श्रवणमननानिदिध्यास
नपूर्वकात्सवासनमिथ्याज्ञाननिवृत्तौतत्कार्याणांरागद्वेषमोहानांनिवृत्तिस्ततस्तत्कार्ययोधर्माधर्मयोस्ततःपूर्वार्जितकर्मणांकायव्यूहपूर्वकभोगे
नक्षयाच्छरीरांतरानारंभस्ततोबाधनालक्षणस्यैकविंशतिप्रभेददुःखस्यात्यंतिकविमोक्षोऽपवर्गइतिकल्पयंतीति॥अत्रमतेजीवेश्वरजगद्वैतुप्राग्व ३
देवबोध्यं॥१०॥

अन्यथानुपपत्तिश्चेदस्तिवस्तुप्रसाधिकेत्यादिभगवत्कश्मीरेश्वराचार्यचरणारुणनलिनवचनात्यानोदेवदत्तोदिवानभुंक्तइत्याद्युदाहरणसहस्रसिद्ध्यार्थो
पत्त्यादिप्रमाणद्वयस्यापलापाद्वुक्तमतेप्यस्वरसात्प्रमाणषट्कवादिनांमीमांसकानांमतत्रयमुपन्यस्यन्प्रथममंतत्रापिज्ञधन्यमेकभाविकानांसिद्धांतंबो
धयति॥नित्यादेरिति॥नित्यंसदायावदायुर्नकदाचिदतिक्रमेत्॥इत्युक्त्यातिक्रमेदोषश्रुतेरत्यागचोदनात्॥फलाश्रुतोवेक्षयाचतन्नित्यामितिकी
र्तितमितिकालमाधवोदाहृतनित्यत्वबोधकनिमित्तानैमित्तिकान्यतमघटितत्वेसतिश्रुत्यादिविहितंसंध्यावंदनादिनित्यकर्मेत्यर्थः॥आदिनानैमित्तिकस्यजा
तेष्ट्यादिकर्मणःसंग्रहः॥कृतितःसर्वदायथाकालमध्यंगमनुष्ठानादित्यर्थः॥अन्यस्यकाम्यादेरित्यर्थः॥आरब्धेति॥प्रारब्धस्यसुकृतादेर्भोगादिति

नित्यादेःकृतितोन्यस्यत्यागादारब्धयोगतः॥मोक्षंकर्मक्षयंज्ञानंविनैकभविकाजगुः॥११॥

यावत्॥एकभविकाःएकजन्ममात्रसाधनेनमुक्तिमानिनोमीमांसकविशेषाइत्यर्थः॥ज्ञानंविनेवकर्मक्षयंमोक्षंजगुरितिसंबंधः॥तथाचोक्तंश्री
मधुसूदनसरस्वतीभिः॥अपरेतुएकभविकन्यायेनआत्मज्ञानमंतरेणापिनिषिद्धकाम्ययोरननुष्ठानाच्चनागामिकर्मोत्पादःविद्यमानस्य
चोपभोगेनक्षयात्सकलकर्माछेदलक्षणमपवर्गमाहुरिति॥अत्रजीवेश्वरजगद्वैतुप्राग्वदेव॥प्रमाणान्यथापत्तयेवतत्राप्यन्यथानुपप
त्यपरनाम्नस्तथोपपत्तिरभावापरनामकोऽनुपलब्धिश्चेतिप्रमाणद्वयमधिकंबोध्यं॥११॥ ॥श्रीराधाकृष्णार्पणमस्तु॥ ॥ ॥ ॥

ननुनमेवविदित्वाऽतिमृत्युमेतिनान्यःपंथाविद्यतेयनायेत्यादिश्रुतिसहस्रैर्मुक्तेर्ज्ञानैकसाध्यत्वोक्तेःकथंज्ञानंविनेवतत्सिद्धिमयंस्वीकुरुतेकिंचास्त्वंयंनित्यादिकर्मव्यवस्थानथापिप्रारब्धक्रियमाणाभ्यामन्यस्यसर्ववैदिकसंमतस्यसंचिताख्यस्यपुण्यादेःकथंवानाशइत्याद्यरुच्याज्ञानमपिमोक्षसाधनत्वेनांगीकर्तुंप्रभाकरस्यमतंसंक्षिपति॥नेशइति॥विहितान्ततमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणइत्यादिविधिचोदितादित्यर्थः॥ज्ञानादात्मज्ञानादितियावत्॥प्राकांभोरेःप्रभाकराभिधस्यगुर्वपरनाम्नोभट्टशिष्यस्यमतानुयायिनःप्राभाकरास्तेइत्यर्थः॥ईशःनद्यतःनेवस्वीकृतःतथाऽऽहुर्हेतोरुक्तलक्षणोमोक्षस्तुतइतियोजना॥तदुक्तंसिद्धांतबिंदौवेदांतकल्पलतिकायांच॥नास्तिसर्वज्ञत्वाद्युपेतंब्रह्मात्मान्यस्यक्रियापरत्वेनतत्रतात्पर्याभावात्किंतुवाक्यंधेनुमुपासीतेतिवज्जगत्कारणंपरमाण्वादिवाजीवोवोयास्यइतिमीमांसकाइति॥प्राभाकराअपिवैदिककर्मानुष्ठानाद्विहितात्मज्ञानपूर्वकाद्देहेंद्रियादिवंधस्यधर्माधर्मपरि

नेशःसकर्मकान्ज्ञानात्विहितात्कर्मनाशजः॥मोक्षोदेहादिसंबंधध्वंसःप्राभाकरैर्मतः॥१२॥आत्मानुजडबोधात्माज्ञानकर्मसमुच्चयात्॥
नित्याज्ञानात्सुखंनित्यंमोक्षोभाट्टमतेमतः॥१३॥इतिमीमांसकत्रय्याःप्रयोत्याश्रानुजामानं॥मानषट्कमभीप्सित्याःप्रोक्तमेतन्मतत्रयं॥१४॥

क्षयानिमित्तमात्यंतिकोच्छेदंमोक्षंमन्यंतइतिच॥इहापिजीवज्जगत्प्रमाणस्वरूपंप्राग्वदेव॥१२॥अत्रापिभावस्यमुपमर्थतानोचित्यरूपात्स्वरसान्नाद्विरुद्धंभाट्टमतमुपन्यसति॥आत्मात्विति॥एतदप्युक्तंतत्रैव॥जडबोधात्मकइतिभाट्टाइति॥भाट्टास्तुज्ञानकर्मसमुच्चयादेवात्मनोजडबोधात्मकस्यनित्यज्ञानेनित्यस्वरूपंचोदितंततश्चाविषयाविशेषानपेक्षयानित्यज्ञानेनानित्यसुखाभिव्यक्तिर्मुक्तिरित्याऽऽहुरितिच॥अत्रापिजगत्प्रमाणान्नाभावरूपदेव॥अक्षरार्थस्तुस्फुटएवेति॥१३॥एवमुक्तमीमांसकमतत्रयमुपसंहरंस्तद्दार्यतत्संमतप्रमाणसंख्यांचकथयति॥इतीति॥जैमिनिमेतन्नामानंमुनिमनुसृत्यांत्यास्तदनुसारिण्यामानषट्कंप्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्ध्याख्यषट्संख्याकप्रमाणानिअभीप्सित्याःचाछंत्याःइतिनिरुक्तैक

भविकादिप्रकारेणमीमांसकत्रय्याःत्रिविधमीमांसकानामेतदुक्तरूपंमतत्रयंप्रोक्तमितियोजना॥१४॥

दुःखेति॥दुःखस्याध्यात्मिकादेस्त्रिविधतापस्यसम्यन्मूलरुदयभूत्यंयद्रोधनंसंकोचनंतदेवमुक्तिरितिसांख्याख्यकपिलाःसांख्यापरनामकाःकपिलाचार्यमतानुयायिनोवादिनोवदंतीत्यन्वयः॥चतुर्विंशतितत्वानिपंचविंशःपुरुषश्चोक्तःसांख्यसमत्यांमूलप्रकृतिरविकृतिर्महदाद्याःप्रकृतिविकृतयःसप्त॥षोडशकश्चविकारोनप्रकृतिःनविकृतिःपुरुषइति॥अस्यार्थःमूलप्रकृतिर्विश्वस्यादिकारणमविकृतिर्नकस्यापिविकारोस्तिकिंत्वनादिरेवमेत्यर्थः॥एवंमहदाद्याःसप्तमहत्तत्वादिगंधांताःप्रकृतिविकृतयःपूर्वोक्तप्रकृतेःपथसोरध्यादिवद्विकाराइतियावत्॥षोडशकःषोडशाद्यंतःकरणांतषोडशसंख्याकतत्वसमूहःविकारःशब्दादिपंचतन्मात्रपरिणामइत्यर्थः॥तुपुनःपुरुषःआत्माकस्यापिप्रकृतिःकारणमपिनभवतिविकृतिःकार्यमपिनभवतीति॥श्रीमधुसूदनसरस्वत्याद्याः॥भोक्तैवकेवलंबोधात्मकइतिसांख्याइति॥सांख्यास्तुप्रकृतिपुरुषविवेकादनाद्यविवेकनिवृत्तोतंपुरुषंप्रतिचरिताधिकारायाःप्रकृतेर्नेपुनस्तद्भोगार्थीप्रवृत्तिरितित्रिविधदुःखस्यैकांतात्यंतनिरोएवस्वभावोकेवल्यमित्याऽऽहुरितिच॥विस्तरस्तुसांख्यभाष्यादौज्ञेयइतिदिक्

दुःखसंरोधनंमुक्तिरितिसांख्याख्यकापिलाः॥क्लेशाद्यमृष्टचिद्रूपःसर्वज्ञोनित्यईश्वरः॥१५॥अष्टांगयोगतोमुक्तिरितिपातंजलंमतं॥ईशःपशुपतिर्मुक्तिस्तत्साक्षात्प्रणिधानादीज्यया॥१६॥

ननुयःपृथिव्यांतिष्ठन्नित्याद्यंतर्यामिब्राह्मणादिषुप्रसिद्धस्यपरमेश्वरस्यकथमपलापःसमुचितइत्याद्यरुच्यानदंगीकारिणांपातंजलानांमतमाह॥क्लेशाद्यमृष्टइति॥आदिपदात्कर्मादि॥तथाचसिद्धांतबिंदौपरमेश्वरंप्रकृत्य॥क्लेशकर्मविपाकाशयैरपरामृष्टोनित्यज्ञानादिरूपःप्रधानांशसत्वगुणप्रतिफलिततथासर्वज्ञःसंसारिपुरुषविलक्षणएवेतिपातंजलाइति॥१६॥अष्टांगेति॥इदमप्युक्तंवेदांतकल्पलतिकायांपातंजलास्तुप्रकृतिपुरुषविवेकेनाभ्यासवैराग्याद्परिपाकाद्यमनियमासनप्राणायामप्रत्याहारधारणाध्यानासंप्रज्ञातसमाधिपूर्वकात्परमेश्वरप्रसादज्ञानंचाविद्यानांविनष्टानांनिरोधादेवधर्ममेघशब्दितादसंप्रज्ञातसमाधेःकैवल्यमितिकल्पयंतीति॥अत्रजगज्जीवमुक्तिस्वरूपाणिसांख्यसंमतान्येव॥अप्रसंगात्तदेकदेशानांपाशुपतपांचरात्रिकरामानुजाख्यानांमतानिवैमत्यप्रयोजनार्थंकथयन्प्रथमंपाशुपतमतमुपक्षिपति॥ईशइति॥१७॥ ॥

PAGE(S)MISSING

NOT AVAILBLE

5

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ननुयद्येवंतर्हिकरयुरुप्रभृतीनांमहानुभावानामपिवाचंकिमितिमिथ्याभूतंभेदघटितंदेहात्मवादितत्तच्छास्त्रसिद्धांतंप्रतिपादयांबभूवुरितिचेत्सत्यं॥अनधिकारिव्यामोहनार्थमेवतेषांतथातथाप्रवृत्तत्वेनतत्रतत्रतात्पर्याभावात्॥अतएवोक्तंभगवतासांख्यभाष्यकारेण॥अस्मद्यापापानामप्रतिबंधार्थमास्तिकदर्शनेष्वपिभ्रांत्यादिश्रुतिविरुद्धार्थव्यवस्थापनेनेतरेषांदोषोद्भावनमात्रेणैवेत्याह॥श्रीशंकरइति॥श्रीमद्भिर्नैसर्ग्यसंपन्नंयत्शंकरःचतुर्भिःसहशिष्यैस्तंशंकरोवतरिष्यतीतिपुराणवचनात्साक्षाच्छिवएवभगवान्शंकराचार्यःतस्येदंतस्मिन्भाष्यकारीयइत्यर्थःमतेसिद्धांते॥अत्रस्वप्रकाशत्वेननित्यापरोक्षइतियावत्॥एतादृशोअद्वैतात्मनिद्वैतशब्दितद्व्यभून्येप्रत्यगभिन्नेनित्यशुद्धबुद्धमुक्तस्वप्रकाशपरमानंदघनेसत्यज्ञानानंताद्वैतात्मपरिपूर्णब्रह्मणिविषयइत्यर्थः॥यावच्छास्त्रेति॥यावतांशास्त्राणां

श्रीशंकरमतेत्रास्तियावच्छास्त्रसमन्वयः॥अद्वैतात्मन्यसौमोक्षस्तज्ज्ञानाद्ध्यज्यतेयतेः॥२४॥

मीमांसाद्यखिलदर्शनानांसमन्वयःसम्यक्वास्तविकनात्पर्येणयोन्वयःपर्यवसानंपरिपाकःसोस्तीतियोजना॥श्रीमद्भगवत्पूज्यपादमतेतावत्स्वयंप्रकाशमानेप्रत्यगभिन्नेब्रह्मण्येवसर्वदर्शनपर्यवसानंभवतीतिभावः॥विस्तरस्तुसूतसंहितायज्ञवैभवखंडीयाष्टमाध्यायटीकायांबोध्यः॥तथाअसौअद्वैतात्मामोक्षःकेवल्यस्वरूपःतज्ज्ञानात्तादृशैक्यकदृढतमसाक्षात्कारान्निमित्तादित्यर्थः॥यतेःसंध्यावंदनमारभ्यनिदिध्यासनांतयतनशीलस्यमुमुक्षोः॥व्यज्यतेसकार्यकाविद्याध्वंसद्वारकंदर्पणामीकरन्यायेनप्रगटइवभवतीत्यर्थः॥२४॥इतिश्रीमद्व्युतविरचितसाहित्यसारीयचतुर्थरत्नांतर्गतमतोपन्यासःसमाप्तः॥ ॥श्रीराधाकृष्णार्पणमस्तु॥शके१७९४॥त्र्यंबकस्यपुस्तकं॥ ॥